শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

## শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৯

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥ শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৯

*জগতসৃষ্টিপ্ৰকারৱৰ্ণনম্*

স্থিতঃ স কমলোদ্ভৱস্তৱ হি নাভিপঙ্কেরুহে
　　কুতস্বিদিদমম্বুধাৱুদিতমিত্যনালোকযন্।
তদীক্ষণকুতূহলাত্ প্ৰতিদিশং ৱিৱৃত্তানন-
　　শ্চতুৰ্ৱদনতামগাদ্বিকসদষ্টদৃষ্ট্যম্বুজাম্॥ ১ ॥

মহাৰ্ণৱৱিঘূৰ্ণিতং কমলমেৱ তত কেৱলং
　　ৱিলোক্য তদুপাশ্ৰযং তৱ তনুং তু নালোকযন্।
ক এষ কমলোদরে মহতি নিসসহাযো হ্যহং
　　কুতঃ স্বিদিদমম্বুজং সমজনীতি চিন্তামগাত্॥ ২ ॥

অমুষ্য হি সরোরুহঃ কিমপি কারণং সম্ভৱে-
　　দিতি স্ম কৃতনিশ্চযসস খলু নালরন্ধ্ৰাধৱনা।
স্বযোগবলৱিদ্যযা সমৱরূঢৱান্ প্ৰৌঢধী-
　　স্তৱদীযমতিমোহনং ন তু কলেবরং দৃষ্টৱান্॥ ৩ ॥

ততসসকলনালিকাৱিৱরমাৰ্গগো মাৰ্গযন
　　প্ৰযস্য শতৱতসরং কিমপি নৈৱ সন্দৃষ্টৱান্।
নিৱৃত্য কমলোদরে সুখনিষণ্ণ একাগ্ৰধীঃ
　　সমাধিবলমাদধে ভৱদনুগ্ৰহৈকাগ্ৰহী॥ ৪ ॥

শতেন পরিৱতসরৈৰ্দৃঢসমাধিবন্ধোল্লসত্-
　　প্ৰবোধৱিশদীকৃতসস খলু পদ্মিনীসম্ভৱঃ।
অদৃষ্টচরমদভুতং তৱ হি রূপমন্তৰ্দৃশা
　　ৱ্যচষ্ট পরিতুষ্টধীৰ্ভুজগভোগভাগাশ্ৰযম্॥ ৫ ॥

www.prapatti.com

কিৰীটমকুটোল্লসৎ কটকহাৰকেয়ূৰযুঙ-
মণিস্ফুৰিতমেখলং সুপৰিৱীতপীতাম্বৰম্।
কলায়কুসুমপ্ৰভং গলতলোল্লসতকৌস্তুভং
ৱপুস্তদয়ি ভাৱয়ে কমলজন্মনে দৰ্শিতম্॥ ৬ ॥

শ্ৰুতিপ্ৰকৰদৰ্শিতপ্ৰচুৰৱৈভৱ শ্ৰীপতে
হৰে জয় জয় প্ৰভো পদমুপৈষি দিষ্ট্যা দৃশোঃ।
কুৰুষ্ৱ ধিয়মাশু মে ভুৱননিৰ্মিতৌ কৰ্মঠা-
মিতি দ্ৰুহিণৱৰ্ণিতস্বগুণবংহিমা পাহি মাম্॥ ৭ ॥

লভস্ব ভুৱনত্ৰয়ীৰচনদক্ষতামক্ষতাং
গৃহাণ মদনুগ্ৰহং কুৰু তপশ্চ ভূয়ো ৱিধে।
ভৱত্ৱখিলসাধনী ময়ি চ ভক্তিৰত্যুতকটে-
ত্যুদীৰ্য গিৰমাদধা মুদিতচেতসং ৱেধসম্॥ ৮ ॥

শতং কৃততপাস্ততসস খলু দিৱ্যসংৱতসৰা-
নৱাপ্য চ তপোবলং মতিবলং চ পূৰ্ৱাধিকম্।
উদীক্ষ্য কিল কম্পিতং পয়সি পঙ্কজং ৱায়ুনা
ভৱদবলৱিজৃম্ভিতঃ পৱনপাথসী পীতৱান্॥ ৯ ॥

তৱৈৱ কৃপয়া পুনসসৰসিজেন তেনৈৱ সঃ
প্ৰকল্প্য ভুৱনত্ৰয়ীং প্ৰৱৱৃতে প্ৰজানিৰ্মিতৌ।
তথাৱিধকৃপাভৰো গুৰুমৰুতপুৰাধীশ্বৰ
ত্বমাশু পৰিপাহি মাং গুৰুদয়োক্ষিতৈৰীক্ষিতৈঃ॥ ১০ ॥

**********



www.prapatti.com